[१] ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥ ७ ॥

कुर्वाणाचीरमात्मनः । वासाग्ंसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिस्सह स्वाहा । आमायन्तु ब्रह्मचारिणस्स्वाहा । विमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा । प्रमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा । दमायन्तु ब्रह्मचारिणस्स्वाहा । शमायन्तु ब्रह्मचारिणस्स्वाहा ॥ ८ ॥

यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन् सहस्रशाखे । निभगाऽहं त्वयि मृजे स्वाहा । यथाऽऽपः प्रवताऽऽयन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतस्स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥ १.७-९ ॥

**[1]** Om yaśchandasāmṛṣabho viśvarūpaḥ | chandobhyo'dhyamṛtāt sambabhūva | sa mendro medhayā spṛṇotu | amṛtasya deva dhāraṇo bhūyāsam | śarīraṁ me vicarṣaṇam | jihvā me madhumattamā | karṇābhyāṁ bhūri viśruvam | brahmaṇaḥ kośo 'si medhayā pihitaḥ | śrutaṁ me gopāya | āvahantī vitanvānā || 7 ||

kurvāṇācīramātmanaḥ | vāsāgṁsi mama gāvaśca | annapāne ca sarvadā | tato me śriyamāvaha | lomaśāṁ paśubhissaha svāhā | āmāyantu brahmacāriṇassvāhā | vimā''yantu brahmacāriṇassvāhā| pramā''yantu brahmacāriṇassvāhā | damāyantu brahmacāriṇasvāhā | śamāyantu brahmacāriṇassvāhā || 8 ||

yaśo jane'sāni svāhā | śreyān vasyaso'sāni svāhā | taṁ tvā bhaga praviśāni svāhā | sa mā bhaga praviśa svāhā | tasmin sahasraśākhe | nibhagā'haṁ tvayi mṛje svāhā | yathā''paḥ pravatā''yanti | yathā māsā aharjaram | evaṁ māṁ

brahmacāriṇaḥ । dhātarāyantu sarvatassvāhā । prativeśo'si pra mā bhāhi pra mā padyasva ।। 1.7-9 ।।

[२] ॐ अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि । द्रविणꣳ सवर्चसम् । सुमेधा अमृतोऽक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥ १८ ॥

**[2]** om aham vṛkṣasya rerivā । kīrtiḥ pṛṣṭham gireriva । ūrdhvapavitro vājinīva svamṛtamasmi । draviṇam̐ savarcasam । sumedhā amṛto'kṣitaḥ । iti triśaṅkorvedānuvacanam ।। 1.18 ।।

[३] ॐ ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । २.१

**[3]** om brahmavidāpnoti param। tadeṣā'bhyuktā। satyam jñānamanantam brahma । yo veda nihitam guhāyām parame vyoman । so'śnute sarvān kāmānsaha । brahmaṇā vipaściteti । tasmādvā etasmādātmana ākāśassambhūtaḥ । 2.1

[४] यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीर आत्मा । २.४

**[4]** yato vāco nivartante । aprāpya manasā saha । ānandam brahmaṇo vidvān । na bibheti kadācaneti । tasyaiṣa eva śārīra ātmā । 2.4

[५] असन्नेव स भवति । असद्-ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । २.६

**[5]** asanneva sa bhavati । asad-brahmeti veda cet । asti brahmeti cedveda । santamenam tato viduriti । 2.6

[६] भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम
इति । सैषाऽऽनन्दस्य मीमाग्ंसा भवति । २.८

[6] bhīṣā'smādvātaḥ pavate | bhīṣodeti sūryaḥ | bhīṣā'smādagniścendraśca |
mṛtyurdhāvati pañcama iti | saiṣā''nandasya mīmāgṁsā bhavati | 2.8

[७] यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति
कुतश्चनेति । एतग्ं ह वा व न तपति । किमहग्ं साधु नाकरवम् । किमहं पापमकरवमिति । स
य एवं विद्वानेते आत्मानग्ग् स्पृणुते । उभे ह्येवैष एते आत्मानग्ग् स्पृणुते ॥ य एवं वेद ।
इत्युपनिषत् ॥ २.९ ॥

[7] yato vāco nivartante | aprāpya manasā saha | ānandaṁ brahmaṇo vidvān |
na bibheti kutaścaneti | etagaṅg ha vā va na tapati | kimahagaṅg sādhu
nākaravam | kimahaṁ pāpamakaravamiti | sa ya evaṁ vidvānete ātmānagg
spṛṇute | ubhe hyevaiṣa ete ātmānagg spṛṇute || ya evaṁ veda | ityupaniṣat ||
2.9 ||

[८] यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति ।
तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ३.१ ॥

[8] yato vā imāni bhūtāni jāyante| yena jātāni jīvanti |
yatprayantyabhisaṁviśanti | tadvijijñāsasva | tadbrahmeti | sa tapo'tapyata | sa
tapastaptvā || 3.1 ||